# हरियाणा विद्यालय शिक्षा बोर्ड

## पाठ्यक्रमस्य अध्यायानुसारम् अङ्कानां विभाजनं च (2023-24)

**कक्षा – द्वादशी** **विषयः - संस्कृतम्** **कोडः - 526**

**सामान्यनिर्देशाः -**

1. सम्पूर्णपाठ्यक्रमस्य आधारे एका वार्षिकी परीक्षा भविष्यति।
2. वार्षिकी परीक्षा 80 अङ्कानां भविष्यति एवञ्च आन्तरिकं मूल्याङ्कनं 20 अङ्कानां भविष्यति।
3. आन्तरिकमूल्याङ्कनस्य कृते निम्नानुसारम् आवधिकं मूल्याङ्कनं भविष्यति :-

(i) **6 अङ्कानां कृते** - द्वयोः सैट (SAT) इत्यनयोः पूर्वबोर्डपरीक्षाणाञ्च आयोजनं भविष्यति। तासु परीक्षासु अन्तिमान्तरिकमूल्याङ्कने 4+2=06 अङ्कानां भाराङ्को भविष्यति।

(ii) **2 अङ्कयोः कृते** - एका अर्द्धवार्षिकी परीक्षा भविष्यति। यस्याः अन्तिमान्तरिकमूल्याङ्कने 2 अङ्कयोः भाराङ्को भविष्यति।

(iii) **2 अङ्कयोः कृते** - शिक्षकाः कक्षा-कक्षयोः सहभागितायाः (CRP) कृते मूल्याङ्कनं करिष्यन्ति एवञ्च अधिकतमौ द्वौ अङ्कौ अन्तिमान्तरिकमूल्याङ्कने दास्यन्ति।

(iv) **5 अङ्कानां कृते** - छात्राः परियोजनाकार्यं करिष्यन्ति। यस्य अन्तिमान्तरिकमूल्याङ्कने 05 अङ्कानां भाराङ्को भविष्यति।

(v) **5 अङ्कानां कृते** - छात्राणाम् उपस्थितेः अनुसारेण अधिकतमाः 05 अङ्काः प्रदीयन्ते :-

| | | |
|---|---|---|
| 75% तः | 80% पर्यन्तम् | = 01 अङ्कः |
| 80% तः उपरि | 85% पर्यन्तम् | = 02 अङ्कौ |
| 85% तः उपरि | 90% पर्यन्तम् | = 03 अङ्काः |
| 90% तः उपरि | 95% पर्यन्तम् | = 04 अङ्काः |
| 95% तः उपरि | | = 05 अङ्काः |

# पाठ्यक्रमस्य संरचना (2023-24)

**कक्षा - द्वादशी** **विषयः - संस्कृतम्** **कोडः - 526**

| क्रम-संख्या | आकलनबिन्दवः | अङ्काः |
|---|---|---|
| 1. | **खण्डः ‘क’ अपठितावबोधनम्**<br>• अपठितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत | 10 |
| 2. | **खण्डः ‘ख’ रचनात्मक-कार्यम्**<br>• निबन्धमेकमधिकृत्य षड्वाक्यानि संस्कृतभाषया लिखत<br>• छन्दाधारितानां प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत<br>• अलङ्काराधारितानां प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत | 6<br>6<br>6 |
| 3. | **खण्डः ‘ग’ पठित-अवबोधनम् (पाठ्यपुस्तकम्)** | |

| पाठसंख्या | पाठानां नामानि | आकलनबिन्दवः | अङ्काः |
|---|---|---|---|
| 1. | विद्ययाऽमृतमश्नुते | • गद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थम् | 4 |
| 2. | रघुकौत्ससंवादः | • पद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थम् | 4 |
| 3. | बालकौतुकम् | • द्वयोः सूक्त्योः भावार्थं लिखत **अथवा** श्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत | 4 |
| 4. | कर्मगौरवम् | • गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत | 3 |
| 5. | शुकनासोपदेशः | • श्लोकं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत | 3 |
| 6. | सूक्तिसुधा | • रेखाङ्कित / स्थूलपदानि आधृत्य कोष्ठकात् प्रश्ननिर्माणकरणम् | 4 |
| 7. | विक्रमस्यौदार्यम् | • कविपरिचयाधारितानां प्रदत्तप्रश्नानाम् उत्तराणि | 4 |
| 9. | कार्यं वा साधयेयं देहं वा पातयेयम् | • रचनापरिचयाधारितानां प्रदत्तप्रश्नानाम् उत्तराणि | 4 |
| 10. | दीनबन्धुः श्रीनायारः | | |

| क्रम-संख्या | आकलनबिन्दवः | अङ्काः |
|---|---|---|
| 4. | **खण्डः – ‘घ’ अनुप्रयुक्त-व्याकरणम्**<br>• सन्धेः कारकस्य समासस्य च परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत | 6 |
| 5. | **खण्डः – ‘ङ’ बहुविकल्पीय-प्रश्नाः**<br>• **पाठाधारित-अभ्यासात्** - सन्धिः/ सन्धिच्छेदः, समासः/विग्रहः, प्रत्ययः संयोगः वियोगश्च, उपपदविभक्तिः, पर्यायपदम्, विलोमपदम्, विशेषण-विशेष्यपदम् | 16 |
| | **योगः** | **80** |
| | **आन्तरिक-मूल्याङ्कनम्** | **20** |
| | **सम्पूर्णाङ्काः** | **100** |

| प्रथमः पाठः - विद्ययाऽमृतमश्नुते |
|---|
| मन्त्राणां सस्वरगानस्य मन्त्राणार्थानां च भावार्थबोधनम्। अन्वयस्य ज्ञानप्रदानम्। वेदानां परिचयः हिन्दीभाषया। मन्त्रेषु आधारितानां प्रश्नोत्तराणाम् एकपदेन पूर्णवाक्येन च उत्तरप्रदानस्य अभ्यासः। पाठे आगतानां पर्यायपदानां विलोमपदानां समुचितपदानां योजनस्य रिक्तस्थानपूर्तेः सन्धि-प्रत्ययानाञ्च ज्ञानप्रदानम्। पाठान्तर्गत-अभ्यासकार्यम्। |
| **द्वितीयः पाठः - रघुकौत्ससंवादः** |
| पाठपरिचयः कविपरिचयः पद्यवाचनस्य अभ्यासः पद्यांशस्य सरलार्थज्ञानम् अन्वयस्य ज्ञानप्रदानम्। पद्यांशाधारितानां प्रश्नोत्तराणां च अभ्यासः। प्रश्ननिर्माणस्य अभ्यासकार्यम्। पाठे आगतानां पर्यायपदानां विलोमपदानां समासानां समुचितपदानां योजनस्य विशेष्य-विशेषणपदानां प्रत्ययानाञ्च ज्ञानप्रदानम्। पाठान्तर्गत-अभ्यासकार्यम्। |
| **तृतीयः पाठः - बालकौतुकम्** |
| पाठपरिचयः लेखकपरिचयः नाट्यांशवाचनस्य अभ्यासः नाट्यांशस्य सरलार्थज्ञानं पद्यांशस्य सरलार्थज्ञानम् अन्वयस्य च ज्ञानप्रदानम्। नाट्यांशाधारितानां पद्यांशाधारितानां च प्रश्नोत्तराणाम् अभ्यासः। प्रश्ननिर्माणस्य अभ्यासः। निर्देशानुसारं रिक्तस्थानपूर्तेः अभ्यासः। समासज्ञानप्रदानम्। पाठान्तर्गत अभ्यासकार्यम्। |
| **चतुर्थः पाठः - कर्मगौरवम्** |
| पाठपरिचयः कविपरिचयः पद्यवाचनस्य अभ्यासः पद्यांशस्य सरलार्थज्ञानम् अन्वयस्य च ज्ञानप्रदानम्। पद्यांशाधारितानां प्रश्नोतराणाम् अभ्यासः। प्रश्ननिर्माणस्य अभ्यासः। पाठे आगतानां पर्यायपदानां विलोमपदानां च ज्ञानम्। सन्धिज्ञानम्। पाठान्तर्गत-अभ्यासकार्यम्। |
| **पञ्चमः पाठः - शुकनासोपदेशः** |
| कथाग्रन्थपरिचयः लेखकपरिचयः गद्यवाचनस्य अभ्यासः गद्यांशस्य सरलार्थज्ञानं गद्यांशाधारितानां प्रश्नोतराणाम् एकपदेन पूर्णवाक्येन च अभ्यासः। पाठे आगतानां विशेष्य-विशेषणपदानां ज्ञानप्रदानम्। समासज्ञानप्रदानम्। सन्धिज्ञानम्। पाठान्तर्गत-अभ्यासकार्यम् । |
| **षष्ठः पाठः - सूक्तिसुधा** |
| पाठपरिचयः कविपरिचयः पद्यवाचनस्य अभ्यासः पद्यांशस्य सरलार्थज्ञानम् अन्वयस्य ज्ञानप्रदानञ्च। पद्यांशाधारितानां प्रश्नोत्तराणाम् एकपदेन पूर्णवाक्येन च अभ्यासः। पाठे आगतानां पर्यायपदानां विलोमपदानां रिक्तस्थानपूर्तेः सन्धि-प्रत्ययानाञ्च ज्ञानप्रदानम्। छन्द-अलङ्काराणां ज्ञानप्रदानम्। पाठान्तर्गत-अभ्यासकार्यम्। |

| |
|---|
| **सप्तमः पाठः - विक्रमस्यौदार्यम्** |
| कथाग्रन्थपरिचयः लेखकपरिचयः गद्यवाचनस्य अभ्यासः गद्यांशस्य सरलार्थज्ञानं पद्यांशस्य सरलार्थज्ञानम् अन्वयस्य च ज्ञानप्रदानम्। गद्यांशाधारितानां पद्यांशाधारितानां च प्रश्नोत्तराणाम् अभ्यासः। रिक्तस्थानपूर्तेः समास-समस्तपदानां विग्रहपदानाञ्च अभ्यासः। सन्धि-प्रत्ययानाञ्च ज्ञानप्रदानम्। पाठान्तर्गत-अभ्यासकार्यम्। |
| **नवमः पाठः - कार्यं वा साधयेयं देहं वा पातयेयम्** |
| ग्रन्थपरिचयः लेखकपरिचयः गद्यवाचनस्य अभ्यासः गद्यांशस्य भावार्थबोधनम्। गद्यांशाधारितानां प्रश्नोत्तराणाम् अभ्यासः। रिक्तस्थानपूर्तेः अभ्यासः। पर्यायपदानां सन्धि-सन्धिविच्छेदपदानां प्रत्ययानाञ्च अभ्यासः। समास-समस्तपदानां विग्रहपदानां ज्ञानप्रदानम्। पाठान्तर्गत-अभ्यासकार्यम्। |
| **दशमः पाठः - दीनबन्धुः श्रीनायारः** |
| कथाग्रन्थपरिचयः लेखकपरिचयः गद्यवाचनस्य अभ्यासः गद्यांशस्य भावार्थबोधनञ्च। गद्यांशाधारितानां प्रश्नोत्तराणाम् अभ्यासः। प्रश्ननिर्माणस्य अभ्यासः। पाठे आगतानां पर्यायपदानां विलोमपदानां विशेष्य-विशेषणपदानां प्रत्ययानाञ्च अभ्यासः। समास-समस्तपदानां विग्रहपदानाञ्च ज्ञानम्। पाठान्तर्गत-अभ्यासकार्यम् । |

# मासिकपाठ्यक्रमस्य शिक्षण-योजना (2023-24)

**कक्षा – द्वादशी विषयः - संस्कृतम् कोडः - 526**

| मासाः | पाठ्यपुस्तकस्य नाम | पाठ्यबिन्दवः | शिक्षणस्य कालांशाः | पुनरावृत्तेः कालांशाः |
|---|---|---|---|---|
| अप्रैल | शाश्वती भाग-2<br>पाठाधारितं व्याकरणम् | प्रथमः पाठः - विद्ययाऽमृतमश्नुते<br>मन्त्राणां सप्रसङ्ग हिन्दीव्याख्या<br>अभ्यासः कविपरिचयः रचनापरिचयश्च<br>सन्धिः - सन्धेः परिभाषा भेदानां नामानि च।<br>दीर्घसन्धिः गुणसन्धिश्च ।<br>कारकम् - परिभाषा भेदानां परिचयश्च<br>कर्ता कारकम्<br>छन्दः - अनुष्टुप्<br>समासः - परिभाषा भेदानां परिचयश्च ।<br>पठितपद्यांशात् एवम् अपठितगद्यांशात् प्रश्नोत्तराणाम् अभ्यासकार्यम् | 5<br>3<br>5<br>2<br>1<br>2<br>2 | 2 |
| मई | शाश्वती भाग-2<br>पाठाधारितं व्याकरणम् | द्वितीयः पाठः - रघुकौत्ससंवादः<br>गद्यानां सप्रसङ्ग हिन्दीव्याख्या<br>अभ्यासः कविपरिचयः रचनापरिचयश्च<br>स्वरसन्धिः - वृद्धिसन्धिः, यण्-सन्धिः<br>समासः - अव्ययीभावसमासः<br>कारकम् - कर्मकारकम्<br>अलङ्कारः - अनुप्रासः<br>छन्दः – इन्द्रवज्रा<br>प्रत्ययः - क्त्वा, ल्यप्, तुमुन्<br>निबन्धः - संस्कृत भाषायाः महत्त्वम्<br>(केवलं षड्वाक्यानि)<br>पठितगद्यांशात् एवम् अपठितगद्यांशात् प्रश्नोत्तराणाम् अभ्यासकार्यम् | 7<br>2<br>1<br>1<br>1<br>1<br>2<br>1<br>3 | 2 |
| जून | | **ग्रीष्मावकाशेषु संस्कृतसम्बद्धगतिविधयः** | | |
| जुलाई | शाश्वती भाग-2<br>पाठाधारितं व्याकरणम् | परीक्षायाः कृते पुनरावृत्तिकार्यम्<br>तृतीयः पाठः - बालकौतुकम्<br>चतुर्थः पाठः - कर्मगौरवम्<br>पद्यानां नाटयांशानां च सप्रसङ्ग हिन्दीव्याख्या अभ्यासः कविपरिचयः रचनापरिचयश्च<br>सन्धिः - अयादिसन्धिः<br>समासः - तत्पुरुषसमासः<br>कारकम् - करणकारकम् | 4<br>4<br>1<br>1<br>1 | 6<br>1<br>1 |

| | | | | |
|---|---|---|---|---|
| जुलाई | | अलङ्कारः - उपमा<br>निबन्धः - अनुशासनम् (केवलं षड्वाक्यानि) | 1<br>1 | |
| अगस्त | शाश्वती भाग-2<br>पाठाधारितं<br>व्याकरणम् | पञ्चमः पाठः - शुकनासोपदेशः<br>गद्यानां सप्रसङ्ग हिन्दीव्याख्या<br>अभ्यासः कविपरिचयः रचनापरिचयश्च<br>सन्धिः -व्यंजनसन्धेः परिभाषा भेदानां परिचयश्च<br>कारकम् - सम्प्रदानम्<br>समासः - तत्पुरुषस्य भेदानां परिचयः<br>प्रत्ययः - क्त, क्तवतु<br>अलङ्कारः – रूपकः<br>छन्दः – उपेन्द्रवज्रा<br>निबन्धः - प्रातः कालीन भ्रमणम् (केवलं षड्वाक्यानि)<br>पठितगद्यांशात् एवम् अपठितगद्यांशात्<br>प्रश्नोत्तराणाम् अभ्यासकार्यम् | 5<br><br><br>3<br>1<br>2<br>2<br>1<br>1<br>1<br>2 | 2 |
| सितम्बर | रचनात्मककार्यम्<br>व्याकरणम् | पठितापठितावबोधनम्<br>निबन्धः - सत्सङ्गतिः (केवलं षड्वाक्यानि)<br>परोपकारः (केवलं षड्वाक्यानि)<br>प्रत्ययः – मयट्, तृच्, तसि, तसिल्<br>छन्दः – वंशस्थ<br>**अर्द्धवार्षिकी परीक्षा** | 4<br>2<br><br>3<br>1 | 2 |
| अक्तूबर | शाश्वती भाग-2<br>पाठाधारितं<br>व्याकरणम् | षष्ठः पाठः - सूक्तिसुधा<br>सप्तमः पाठः - विक्रमस्यौदार्यम्<br>पद्यानां सप्रसङ्ग हिन्दीव्याख्या अभ्यासः कविपरिचयः रचनापरिचयश्च<br>सन्धिः - व्यंजनसन्धिः श्चुत्व ष्टुत्व<br>समासः - द्विगुः, कर्मधारयः<br>प्रत्ययः – कृदन्त - तव्यत्, अनीयर्<br>कारकम् - अपादानम्<br>अलङ्कारः – यमकः<br>छन्दः – वसन्ततिलका<br>निबन्धः - स्वच्छतायाः महत्त्वम् (केवलं षड्वाक्यानि) | 4<br>4<br><br><br>2<br>1<br>2<br>1<br>1<br>1<br>1 | 1<br>1 |
| नवम्बर | शाश्वती भाग-2<br>पाठाधारितं<br>व्याकरणम् | परीक्षायाः कृते पुनरावृत्तिकार्यम्<br>नवमः पाठः - कार्यं वा साधयेयं देहं वा पातयेयम्<br>गद्यानां नाट्यांशानां च सप्रसङ्ग हिन्दीव्याख्या अभ्यासः कविपरिचयः रचनापरिचयश्च<br>सन्धिः - विसर्गसन्धेः परिभाषा भेदानां परिचयश्च<br>प्रत्ययः - शतृ, शानच्<br>समासः - बहुव्रीहिः<br>अलङ्कारः - श्लेषः | <br>4<br><br><br>2<br>2<br>1<br>1 | 6<br>2 |

| | | | | |
|---|---|---|---|---|
| नवम्बर | | छन्दः – मालिनी<br>कारकम् – सम्बन्धकारकम्<br>निबन्धः - समयस्य सदुपयोगः (केवलं षड्वाक्यानि) | 1<br>1 | |
| दिसम्बर | शाश्वती भाग-2<br>पाठाधारितं व्याकरणम् | दशमः पाठः - दीनबन्धुः श्रीनायारः<br>पद्यानां सप्रसङ्ग हिन्दीव्याख्या<br>अभ्यासः कविपरिचयः रचनापरिचयश्च<br>उपपद-विभक्तयः<br>कारकम् - अधिकरणम्<br>समासः - द्वन्द्वः<br>प्रत्ययः - त्व, तल् (तद्धित) टाप् ङीप् (स्त्री)<br>अलङ्कारः – उत्प्रेक्षा<br>छन्दः - शिखरिणी<br>निबन्धः - मम प्रियः कविः (केवलं षड्वाक्यानि) | 4<br><br><br>4<br>1<br>1<br>2<br>1<br>1<br>1 | 1 |
| जनवरी | शाश्वती भाग-2<br><br>रचनात्मककार्यम् | अलङ्कारः – अतिशयोक्तिः<br>पाठानां पुनरावृत्तिः<br>पठितापठितावबोधनं पुनरावृत्तिश्च | 1 | <br>9<br>2 |
| फरवरी | शाश्वती भाग-2<br><br>रचनात्मककार्यम् | परीक्षायाः कृते पुनरावृत्तिः<br>पठितापठितावबोधनस्य पुनरावृत्तिः<br>अनुप्रयुक्तव्याकरणस्य पुनरावृत्तिः | | 8<br>2<br>10 |
| मार्च | | **वार्षिकी परीक्षा** | | |

## विशेषकथनम् –

- विषयशिक्षकेभ्यः मन्तव्यो दीयते यत् ते छात्राणां शब्दावल्याः अवधारणायाश्च स्पष्टतां वर्धनाय अध्यायेषु प्रयुक्तायाः शब्दावल्याः परिभाषात्मकशब्दानां टिप्पणीपुस्तिका सज्जीकरणाय च निर्देशितं कुर्युः ।

## निर्धारितपुस्तकम् :-

- शाश्वती भाग-2 द्वादशीकक्षायाः कृते पाठ्यपुस्तकम् – BSEH प्रकाशनम्

# प्रश्नपत्रस्य प्रारूपम् (2023-24)

**कक्षा – द्वादशी** **विषयः - संस्कृतम्** **कोडः - 526**

| प्रश्नानां प्रकारः | अङ्काः | संख्या | विवरणम् | पूर्णाङ्काः |
|---|---|---|---|---|
| वस्तुनिष्ठप्रश्नाः | 1 | 2 | 19 बहुविकल्पीयप्रश्नाः | 19 |
| अतिलघूत्तरात्मकप्रश्नाः | 1 | 7 | 4 रिक्तस्थानपूर्तिः प्रश्नाः<br>14 एकपदेन उत्तरत प्रश्नाः<br>7 पूर्णवाक्येन उत्तरत प्रश्नाः | 25 |
| लघूत्तरात्मकप्रश्नाः | 2 | 4 | 11 पूर्णवाक्येन उत्तरत प्रश्नाः | 22 |
| दीर्घ-उत्तरात्मकप्रश्नाः | 4 | 2 | 2 सप्रसङ्गव्याख्यात्मकप्रश्नाः | 08 |
| अतिदीर्घ-उत्तरात्मकप्रश्नाः | 6 | 1 | निबन्धः | 06 |
| **कुल** | | **16** | | **80** |